पूर्व्वसुत्तरश्टङ्गाणां अन्तरं मध्यमस्य च।
त्रिविष्टपो नाकपृष्ठे ह्यप्सरा: सन्ति निर्वृता:॥२४॥
आनन्दोऽथ प्रमोदश्च स्वर्गशृङ्गे तु मध्यमे।
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्मथौ ॥ २५ ॥
आक्रंद: स्वर्गराजा वै स्वर्गशृङ्गे तु पश्चिमे।
निर्म्ममो निरहङ्कार: सौभाग्यश्चातिनिर्म्मल:॥२६॥
स्वर्गाश्चैव द्विजश्रेष्ठ ! पूर्व्वशृङ्गे समाश्रिता:।
एकविंशति स्वर्गा वै निविष्टा मेरुमूर्द्धनि ॥२७॥
अहिंसादानकर्त्तारो यज्ञानां तपसां तथा।
तत्तेषु निवसन्ति स्म जना: क्रोधविवर्जिता:॥२८॥
जलप्रवेशे चानन्दं प्रमोदं वह्निसाहसे।
भृगुप्रपाते सौख्यं च रम्यं चैवास्य निर्म्मलम् ॥२९॥
अनाशके तु संन्यासे न्मतो गच्छेत्त्रिविष्टपम्।
क्रतुयाजी नाकपृष्ठं अग्निहोत्री च निर्वृ-
तिम् ॥ ३० ॥
तड़ागकूपकर्त्ता च लभते पौष्टिकं द्विज:।
सुवर्णदायी सौभाग्यं लभन् स्वर्गतप:फलम् ॥३१॥
शीतकाले महावह्निं प्रज्वालयति यो नर:।
सर्व्वसत्त्वहितार्थाय स्वर्गं सोऽप्सरसं लभेत् ॥३२॥
हिरण्यगोप्रदाने हि निरहङ्कारमाप्नुयात्।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥३३॥
रौप्यदानेन स्वर्गं तु निर्म्मलं लभते नर:।
अश्वदानेन पुण्याहं कन्यादानेन मङ्गलम् ॥३४॥
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तित:।
श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचते ॥३५॥
कपिलागोप्रदानेन परमार्थे महीयते।
गोवृषस्य प्रदानेन स्वर्गं मन्मथमाप्नुयात् ॥३६॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ॥
छत्रोपानहदाता च स्वर्गं यात्युपशोभनम् ॥३७॥
देवतायतनं कृत्वा द्विजशुश्रूषकस्तथा।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥ ३८ ॥
एकान्नभोजी यो मर्त्त्यो नक्तभोजी च नित्यश:।
उपवासी चिरात्राद्यै: शान्त: स्वर्गं शुभं
लभेत् ॥ ३९ ॥
सरित्स्नायी जितक्रोधी ब्रह्मचारी दृढ़व्रत:।
निर्म्मलं स्वर्गमाप्नोति यथाभूतहिते रत: ॥४०॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात्।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥४१॥
तत्तत्स्वर्गमवाप्नोति यद्यदिच्छति मानव:।
चत्वारि अतिदानानि कन्या गौर्भू: सरस्वती॥४२॥
नरकादुद्धरन्त्येते जपवाहनदोहनात्।
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्य: प्रय-
च्छति ॥ ४३ ॥
संप्राप्य न निवर्त्तेत स्वर्गं शान्तमनामयम्।
शृङ्गे तु पश्चिमे यत्र ब्रह्मा तत्र स्थित: स्वयम्॥४४॥
पूर्व्वशृङ्गे स्वयं विष्णु: मध्ये चैव शिव: स्थित:।
अत: परं तु विप्रेन्द्र ! स्वर्गाध्वानमिमं शृणु ॥४५॥
विमलं विपुलं शुद्धसुपर्य्युपरिसंस्थितम्।
प्रथमे तु कुमारस्तु द्वितीये मातर: स्थिता:॥४६॥
तृतीये सिद्धगन्धर्व्वा तुर्य्ये विद्याधरा द्विज !।
पञ्चमे नागराजा च षष्ठे तु विनतासुत: ॥४७॥
सप्तमे दिव्यपितरो धर्म्मराजस्तथाष्टमे।
नवमे तु तथा दक्ष आदित्यो दशमे पथि ॥४८॥
भूर्लोकाच्छतसाहस्रादूर्द्ध्वं चरति भास्कर:।
योजनानां सहस्रे द्वे विष्कम्भनसमं तत: ॥ ४९ ॥
त्रिगुणं परिणाहेन सूर्य्यबिम्बं प्रमाणत:।
सोमपुर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा।
महेन्द्रस्यामरावत्यां तदा तिष्ठति भास्कर: ॥५०॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्कर:।
तदा संयमने याम्ये तत्रोदंस्तु प्रदृश्यते ॥५१॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येव सविता सदा।
ध्रुवाधारस्तथोत्तिष्ठन् वालिखिल्यादिभि:
स्तुत: ॥ ५२ ॥
इति श्रीनरसिंहपुराणे भूवनकोषे त्रिंशो-
ध्याय: ॥ ३० ॥)

भुवन्यु:, पुं, ( भवतीति। “कन्युच् क्षिपेश्च।” उणा० ३। ५१। इति चकारात् भूधातोरपि कन्युच्।) सूर्य्य:। वह्नि:। चन्द्र:। इति मेदिनी। ये, ६८॥ प्रभु:। इत्युणादिकोष:॥

भुवर्लोक:, पुं, ( भुवश्चासौ लोकश्चेति। ) भूरादिसप्तलोकान्तर्गतद्वितीयलोक:। यथा,—
“भूमिसूर्य्यान्तरं यच्च सिद्धादिमुनिसेवितम्।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ! ॥”
इति विष्णुपुराणे। २ अंशे ७ अध्याय: ॥
( यथा च भागवते। २। ५। ८।
“भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य
नाभित:।
हृदा स्वर्लोक उरसा महर्लोको महात्मन: ॥”)

भुव:, [ स् ] व्य, ( भवतीति। भू+“भूरञ्जिभ्यां कित्।” उणा० ४। २१६। इति असुन् स च कित्।) आकाश:। इति हेमचन्द्र: ॥ ( महाव्याहृतिभेद:। यथा, मनु:। २। ७६।
“अकारञ्चाप्युकारञ्च मकारञ्च प्रजापति:।
वेदत्रयान्निरदुहत् भूर्भुव: स्वरितीति च ॥”)

भुवि:, [स्] स्त्री, ( भवतीति भवत्यस्मिन् रत्नादीनि वा। भू+“सुव: कित्।” उणा० २। ११३। इति इसिन्। स च कित्।) समुद्र:। इत्युणादिकोष: ॥

भू, सत्तायाम्। इति कविकल्पद्रुम: ॥ ( भ्वा०-पर०-अक०-सेट्।) सत्तेह द्विविधा। उत्पत्ति-र्विद्यमानता च। भवति मनुष्योऽथवा विष्णु:। इति दुर्गादास: ॥

भू, क शुद्धिचिन्तयो:। मिश्रणे। इति कविकल्पद्रुम:। ( चुरा०-पर०-सक०-सेट्।) क, त्वगवज्ञावयति द्विष: सर्व्वान्। चयोऽर्था:। इति दुर्गादास: ॥

भू, क ङ प्राप्तौ। इति कविकल्पद्रुम: ॥ ( चुरा०-आत्म०-सक०-सेट्।) क ङ, भावयते। इति दुर्गादास: ॥

भू, ञ प्राप्तौ। इति कविकल्पद्रुम:। (भ्वा०-उभ०-सक०-सेट्।) ञ, भवति भवते धनं धीर:। भवत्येव सत्तायां प्राप्तिसम्पन्नजन्मस्विति भट्टमल्ल:। भवते दुरितक्षयं यथोक्तक्रतुभिर्भावयते च नाकलोकमिति हलायुध:। केचिदस्याप्यात्मनेपदित्वं मत्वा प्राप्तौ परस्मैपदं सत्तार्थेऽस्यैवानेकार्थत्वात् समाधत्ते। इति दुर्गादास: ॥

भू, व्य,(भू+क्विप्।) रसातलम्। इति हेमचन्द्र: ॥

भू:, स्त्री, ( भवत्यस्मिन्निति। भू+अधिकरणे क्विप्।) पृथिवी। इत्यमर:। २।१।२॥ (यथा, मनु:। ७। ६।
“न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षि-
तुम् ॥”
यथा च वैद्यकरत्नमालायामस्या: पर्य्याय:।
“भूर्भूमि: पृथिवी पृथ्वी मेदिनी वसुधावनि:।
क्षितिरुर्व्वी मही क्षौणी क्ष्मा धरा कुर्व्वसु-
न्धरा ॥”)
स्थानमात्रम्। इति मेदिनी। भे, १॥ ( यथा, भागवते। ६। ४। ३१।
“यच्छक्तयो वदतां वादिनां वै
विवादसंवादभुवो भवन्ति ॥”
यज्ञाग्नि:। इति जटाधर: ॥

भूकं, क्ली, ( भवतीति। भू+“सृवृभूशुषिमुषिभ्य: कक्।” उणा०३। ४१। इति कक्।) छिद्रम्। काल:। इति मेदिनी। के, ३०॥

भूक:, पुं, ( भू+कक्।) अन्धकार:। इति शब्दमाला ॥

भूकदम्ब:, पुं, ( भुवि कदम्ब इव।) अलम्बुषवृक्ष:। इति रत्नमाला ॥ कोकसीम। इति भाषा ॥

भूकदम्बक:, पुं, ( भूकदम्ब+संज्ञायां कन्।) यवानी। इति राजनिर्घण्ट: ॥ (विवृतिविशेषोऽस्य यवानीशब्दे ज्ञातव्य: ॥ )

भूकन्द:, पुं, ( भुव: पृथिव्या: कन्द इव।) महाश्रावणिका। इति राजनिर्घण्ट: ॥ घुलकुड़ी। इति भाषा ॥

भूकम्प:, पुं, ( भुव: पृथिव्या: कम्प:।) भूमिकम्पनम्। स च अद्भुतविशेष:। यथा, अद्भुतसागरे।
“मेषे वृश्चिकभे गज: प्रचलति वायादिभि:
कथ्यते
चापे मीनकुलीरभे च वृषभे सत्यं चलेत् कच्छप:।
युक्ते कुम्भधरे म्रगेन्द्रमिथुने कन्याङ्गे पन्नग-
स्तेषामेकतमो यदि प्रचलति क्षौणी तदा
कम्पते ॥
“कच्छपे मरणं ज्ञेयं मरणञ्चापि पन्नगे।
सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे ॥
प्रथितनरेश्वरमरणं व्यसनान्याग्नेयमारुतयो:।
क्षुद्भयमतिवृष्टिभिरुपपीड्यन्ते जनाश्चापि ॥
त्रिचतुर्थपञ्चमदिने मासे पक्षे त्रिपक्षके।
भवति यदा भूकम्प: प्रधाननृपनाशनं कुरुते ॥”
स च भूमिजोत्पातविशेष:। यथा,—
“चरस्थिरभवं भौमं भूकम्पमपि भूमिजम्।
जलाशयानां वैकृत्यं भौमन्तदपि कीर्त्तितम् ॥
भौमं जाप्यफलं ज्ञेयं चिरेण परिपच्यते।”
इति ज्योतिस्तत्त्वम् ॥

भूकर्ब्बुदारक: पुं, वृक्षविशेष:। छोटालसोड़ा इति हिन्दी भाषा। तत्पर्य्याय:। क्षुद्रश्लेष्मा-